श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीगरुडदण्डकः ॥

*This document** *has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीगरुडदण्डकः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

नमः पन्नग नद्धाय वैकुण्ठ वश वर्तिने।
श्रुति सिन्धु सुधोत्पाद मन्दराय गरुत्मते॥ १॥

गरुडमखिल वेद नीडाधिरूढं द्विषत्पीडनोत्कण्ठिताकुण्ठ वैकुण्ठपीठीकृत-स्कन्धमीडे स्वनीडागति प्रीत रुद्रा सुकीर्तिस्तनाभोग गाढोपगूढस्फुरत्कण्टक-व्रात वेध व्यथा वेपमान द्विजिह्वाधिपाकल्प विष्फार्यमाण स्फटावाटिका रत्न रोचिश्छटा राजि नीराजितं कान्ति कल्लोलिनी राजितम्॥ २॥

जय गरुड सुपर्ण दर्वीकराहार देवाधिपाहार हारिन् दिवौकस्पति क्षिप्त दम्भोळि धारा किणाकल्प कल्पान्त वातूल कल्पोदयानल्प वीरायितो-द्यच्चमत्कार दैत्यारि जैत्रध्वजारोह निर्धारितोत्कर्ष संकर्षणात्मन् गरुत्मन् मरुत्पञ्चकाधीश सत्यादि मूर्ते न कश्चित् समस्ते नमस्ते पुनस्ते नमः॥ ३॥

नम इद मजहत्सपर्याय पर्याय निर्यात पक्षानिलास्फालनोद्वेल पाथोधि वी-ची चपेटाहतागाध पाताळ भांकार संक्रुद्ध नागेन्द्रपीडासृणी भाव भास्वन्नख श्रेणये चण्ड तुण्डाय नृत्यद्भुजङ्गभ्रुवे वज्रिणे दंष्ट्रया तुभ्यं अध्यात्मविद्या विधेया विधेया भवद्दास्यमापादयेथा दयेथाश्च मे॥ ४॥

मनुरनुगत पक्षि वक्त्र स्फुरत्तारकस्तावकश्चित्रभानुप्रिया शेखरस्त्रायतां नस्त्रि-वर्गापवर्ग प्रसूतिः परव्योम धामन् वलद्वेषिदर्पज्वलद्वालखिल्य प्रतिज्ञावतीर्ण स्थिरां तत्त्व बुद्धिं परां भक्तिधेनुं जगन्मूल कन्दे मुकुन्दे महानन्ददोग्ध्रीं दधीथा मुधाकामहीनां अहीनामहीनान्तक॥ ५॥

षट्त्रिंशद्गण चरणो नर परिपाटी नवीन गुम्भगणः।
विष्णुरथ दण्डकोऽयं विघटयतु विपक्ष वाहिनी व्यूहम्॥ ६॥

विचित्र सिद्धिदः सोऽयं वेङ्कटेश विपश्चिता।
गरुडध्वज तोषाय गीतो गरुड दण्डकः ॥ ७ ॥

॥ इति श्रीगरुडदण्डकः समाप्तः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥